## विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम् । (४९/८१०)

चत्वारिंशत्प्रभृतौ संख्यायामुत्तरपदेऽबहुव्रीह्यशीत्योः सर्वेषां द्वि अष्टन् त्रि इत्येतेषां यदुक्तं तद्विभाषा भवति । द्विचत्वारिंशत्, द्वाचत्वारिंशत् । त्रिपञ्चाशत्, त्रयःपञ्चाशत् । अष्टपञ्चाशत्, अष्टापञ्चाशत् । प्राक्शतात् इत्येव, द्विशतम् । अष्टशतम् । [1]त्रिशतम् ॥

## हृदयस्य हृल्लेखयदण्लासेषु । (५०/९८८)

हृदयस्य हृत् इत्ययमादेशो भवति लेख यत् अण् लास इत्येतेषु परतः । हृदयं लिखति इति हृल्लेखः । यत् – हृदयस्य प्रियम् हृद्यम् । अण् – हृदयस्य इदं हार्दम् । लास – हृदयस्य लासः हृल्लासः । लेख इति [2]अणन्तस्य ग्रहणमिष्यते । घञि तु हृदयस्य लेखो हृदयलेखः[3] । एतदेव लेखग्रहणं ज्ञापकम्, उत्तरपदाधिकारे प्रत्ययग्रहणे [4]तदन्ताग्रहणस्य ॥

## वा शोकष्यञ्रोगेषु । (५१/९८९)

शोक ष्यञ् रोग इत्येतेषु परतः हृदयस्य वा [5]हृदादेशो भवति । हृच्छोकः, हृदयशोकः[6] । ष्यञ् – सौहार्द्यम्, सौहृदयम् । ब्राह्मणादित्वात् ष्यञ् (५. १. १२४/१७८८) । हृदादेशपक्षे 'हृद्भगसिन्ध्वन्ते पूर्वपदस्य च' (७. ३. १९/११३३) [7]इत्युभयपदवृद्धिः । रोगे – हृद्रोगः, हृदयरोगः । हृदयशब्देन समानार्थो हृच्छब्दः प्रकृत्यन्तरमस्ति, [8]तेनैव सिद्धे विकल्पविधानं [9]प्रपञ्चार्थम् ॥

## पादस्य पदाज्यातिगोपहतेषु । (५२/९९०)

[10]पादस्य पद इत्ययमादेशो भवति आजि आति ग उपहत इत्येतेषु उत्तरपदेषु । पादाभ्यामजति इति पदाजिः । पादाभ्यामतति इति पदातिः । 'अज्यतिभ्यां, पादे च' (उ. ५८०,५८१) [11]इत्यौणादिकः इण् प्रत्ययः । तत्र अजेर्वीभावो न भवति अत एव निपातनात् । पादाभ्यां गच्छति इति पदगः । पादेनोपहतः पदोपहतः । पादशब्दो वृषादित्वाद् आद्युदात्तः, तस्य स्थाने[12] पदादेशः [13]उपदेशे एव अन्तोदात्तो निपात्यते, तेन पदोपहतः इति 'तृतीया कर्मणि' (६. २. ४८/३७८२) इति पूर्वपदप्रकृतिस्वरत्वेनान्तोदात्तत्वं भवति । पदाजिः, पदातिः, पदग इत्येतेषु कृत्स्वरेण समासस्यैवान्तोदात्तत्वम्[14] ॥

## पद्यत्यतदर्थे । (५३/९९१)

यत्प्रत्यये परतः पादस्य पद् इत्ययमादेशो भवत्यतदर्थे । पादौ विध्यन्ति पद्याः शर्कराः । पद्याः कण्टकाः । अतदर्थे इति किम् ? पादार्थमुदकं पाद्यम् ।

[७४०] पद्भाव इके चरतावुपसङ्ख्यानम् । (म. भा. ३. १६३)

पादाभ्यां चरति पदिकः । 'पर्पादिभ्यः ष्ठन्' (४. ४. १०/१५५८) इति [15]पादशब्दात् ष्ठन् प्रत्ययः । शरीरावयववचनस्य पादशब्दस्य ग्रहणमिह[16] इष्यते, तेन 'पणपादमाषशताद् यत्' (५. १. ३४/१६९९) इत्यत्र पदादेशो न भवति । द्विपाद्यम् । त्रिपाद्यम् ॥

---

1. नास्ति फ. 2. अणन्तग्रहणम् फ. 3. इत्येव भवति इत्यधिकम् ब. फ. 4. तदन्तविधिर्नास्ति इति ब. इत्यधिकम् ब. फ. ह. 5 हृत् इत्ययमदेशः क. 6. हृत्कलेशः हृदयक्लेशः इत्यधिकम् फ. 7. इति नास्ति फ. 8. तत एव ब. 9. इदं नास्ति क. 10. पादशब्दस्य ड. ह. 11. इति नास्ति क. 12. अयमादेशः फ, अयं पदादेशः क. 13. उपदेशे नास्ति ब. 14. भवति इत्यधिकम् ब. 15. पादशब्दात् नास्ति फ. 16. इह नास्ति ह, इष्यते